श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः
श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्री मेल्पत्तूर् नारायणभट्टतिरि विरचितम्

# ॥ श्रीमन्नारायणीयम् ॥

## दशक - ६९

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the Wikner font.

श्रीः

श्रीमते कृष्णाय परब्रह्मणे नमः

श्रीमते रामानुजाय नमः

# ॥ श्रीमन्नारायणीयम् ॥

## दशक - ६९

*रासक्रीडावर्णनम्*

केशपाशधृतपिञ्छिकाविततिसञ्चलन्मकरकुण्डलं
हारजालवनमालिकाललितमङ्गरागघनसौरभम्।
पीतचेलधृतकाञ्चिकाञ्चितमुदञ्चदंशुमणिनूपुरं
रासकेलिपरिभूषितं तव हि रूपमीश कलयामहे॥ १॥

तावदेव कृतमण्डने कलितकञ्चुलीककुचमण्डले
गण्डलोलमणिकुण्डले युवति मण्डलेऽथ परिमण्डले।
अन्तरा सकलसुन्दरीयुगळमिन्दिरारमण सञ्चरन्
मञ्जुळां तदनु रासकेळिमयि कञ्जनाभ समुपादधाः॥ २॥

वासुदेव तव भासमानमिह रासकेळिरससौरभं
दूरतोऽपि खलु नारदागदितमाकलय्य कुतुकाकुला।
वेषभूषणविलासपेशलविलासिनीशतसमावृता
नाकतो युगपदागता वियति वेगतोऽथ सुरमण्डली॥ ३॥

वेणुनादकृततानदानकळगानरागगतियोजना-
लोभनीयमृदुपादपातकृतताळमेळनमनोहरम्।
पाणिसंक्वणितकङ्कणं च मुहुरंसलम्बितकराम्बुजं
श्रोणिबिम्बचलदम्बरं भजत रासकेळिरसडम्बरम्॥ ४॥

श्रद्धया विरचितानुगानकृततारतारमधुरस्वरे
नर्तनेऽथ ललिताङ्गहारलुळिताङ्गहारमणिभूषणे।
सम्मदेन कृतपुष्पवर्षमलमुन्मिषद्दिविषदां कुलं
चिन्मये त्वयि निलीयमानमिव सम्मुमोह सवधूकुलम्॥ ५॥

स्विन्नसन्नतनुवल्लरी तदनु कापि नाम पशुपाङ्गना
कान्तमंसमवलम्बते स्म तव तान्तिभारमुकुळेक्षणा।
काचिदाचलितकुन्तळा नवपटीरसारघनसौरभं
वञ्चनेन तव सञ्चुचुम्ब भुजमञ्चितोरुपुळकाङ्कुरा॥ ६ ॥

कापि गण्डभुवि सन्निधाय निजगण्डमाकुलितकुण्डलं
पुण्यपूरनिधिरन्ववाप तव पूगचर्वितरसामृतम्।
इन्दिराविहृतिमन्दिरं भुवनसुन्दरं हि नटनान्तरे
त्वामवाप्य दधुरङ्गनाः किमु न सम्मदोन्मददशान्तरम्॥ ७ ॥

गानमीश विरतं क्रमेण किल वाद्यमेळनमुपारतं
ब्रह्मसम्मदरसाकुलाः सदसि केवलं ननृतुरङ्गनाः।
नाविदन्नपि च नीविकां किमपि कुन्तळीमपि च कञ्चुळीं
ज्योतिषामपि कदम्बकं दिवि विळम्बितं किमपरं ब्रुवे॥ ८ ॥

मोदसीम्नि भुवनं विलाप्य विहृतिं समाप्य च ततो विभो
केळिसम्मृदितनिर्मलाङ्गनवघर्मलेशसुभगात्मनाम्।
मन्मथासहनचेतसां पशुपयोषितां सुकृतचोदित-
स्तावदाकलितमूर्तिरादधिथ मारवीरपरमोत्सवान्॥ ९ ॥

केळिभेदपरिलोळिताभिरतिलाळिताभिरबलाळिभिः
स्वैरमीश ननु सूरजापयसि चारुनाम विहृतिं व्यधाः।
काननेऽपि च विसारिशीतळकिशोरमारुतमनोहरे
सूनसौरभमये विलेसिथ विलासिनीशतविमोहनम्॥ १० ॥

कामिनीरिति हि यामिनीषु खलु कामनीयकनिधे भवान्
पूर्णसम्मदरसार्णवं कमपि योगिगम्यमनुभावयन्।
ब्रह्मशङ्करमुखानपीह पशुपाङ्गनासु बहुमानयन्
भक्तलोकगमनीयरूप कमनीय कृष्ण परिपाहि माम्॥ ११ ॥

**********